National Journal of Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2019 1(25): 134-135
© 2019 NJHSR
www.sanskritarticle.com

**Ayachit Shantanu Ambadasrao**
Assistant Professor,
Dept. Of Sanskrit and Philosophy,
Ramakrishna Mission Vivekananda-Educational And Research Institute,
Belur Math, Howrah.

**Correspondence:**
**Ayachit Shantanu Ambadasrao**
Assistant Professor,
Dept. Of Sanskrit and Philosophy,
Ramakrishna Mission Vivekananda-Educational And Research Institute,
Belur Math, Howrah.

# शङ्कराचार्याभिप्रेतः सन्न्यासशब्दार्थः

**अयाचितः शन्तनुः अम्बादासराव्**

अस्माकं भारतीयसंस्कृतेः मूलाधारः भारतीयसमाजव्यवस्था वर्तते। अस्मत्समाजव्यवस्थायाः वर्णाश्रमव्यवस्थाभ्युपगमात् सर्वांशेन परिपोषणं जातमिति दृश्यते। यदा पाश्चात्यानां जीवनदर्शनविषयिणी दृष्टिरपि नासीत् तत्काले महत्संस्कृतसाहित्यमुज्ज्वलं वैदिकं दर्शनञ्चास्मत् देशस्य वैभवं वर्धयन्नासीत् इति तु सर्वविदितमेवास्ति। अस्माकं भारतीयसमाजव्यवस्थायाः प्राणः वर्णाश्रमव्यवस्था। तथा एव तु सर्वेषां धारणं सम्भवति। तस्मादेव धर्मलक्षणं निरूपयता शङ्करेण "प्राणिनां साक्षादभ्युदयनिःश्रेयससिद्धिहेतुर्यः स धर्मः"[1] इति गीताभाष्यपीठिकायां निरूपितम्। तत्रैव प्रवृत्तिलक्षणो धर्मः वर्णाश्रमलक्षणः। निवृत्तिलक्षणस्तु - वैराग्यलक्षणः अर्थात् ससन्न्यासमात्मज्ञानमिति द्वेधा निरूपितः।

वर्णाः ब्राह्मणक्षत्रियवैश्यशूद्रभेदेन भिन्नाः आश्रमास्तु - ब्रह्मचर्यगृहस्थवानप्रस्थसन्न्यासभेदेन भिन्नाः, तत्र सर्वे वर्णाश्रमवाचकाः शब्दाः स्वं स्वमर्थं सम्यगेव गमयन्ति। तथापि सन्न्यासशब्दविषये भाष्यकृतः द्वेधा व्याख्यानदर्शनात् सन्न्यासाश्रमः सन्न्यासः इत्यनयोः विषये भाष्यकारस्य भिन्नतावगमः अस्तीति ज्ञायते। उक्तं च भाष्यकृता- "यद्धि तदेषणाभ्यो व्युत्थानलक्षणं पारिव्राज्यं तदात्मज्ञानाङ्गम्। आत्मज्ञानविरोधि एषणापरित्यागरूपत्वात्। अविद्याविषयत्वाच्चैषणायाः। तद्व्यतिरेकेण चास्ति आश्रमरूपं पारिव्राज्यं ब्रह्मलोकादिफलप्राप्तिसाधनं यद्विषयं यज्ञोपवीतादिसाधनविधानं लिङ्गविधानञ्च।"[2]

इत्थं भाष्यकारवचनश्रवणात् सन्न्यासशब्दविषये आश्रमरूपः अर्थः क्व ग्राह्यः, क्व च एषणात्रयत्याग-निमित्तो सन्न्यासः इत्यर्थो ग्राह्यः इति शङ्का जायते। अस्याः शङ्कायाः निराकरणनिमित्तमेव शोधविषयेऽस्मिन् प्रवृत्तिः। प्रस्थानत्रयदिशा प्रस्थानत्रयभाष्यदिशा चेतः परं सन्न्यासपदार्थं यथामति अवलोकयिष्यामः।

तत्रादौ मुण्डकोपनिषदि "वेदान्तविज्ञानसुनिश्चितार्थाः सन्न्यासयोगात् यतयः शुद्धसत्त्वाः"[3] इत्यस्यां श्रुतौ सन्न्यासपदप्रयोगमुपलभामहे। तत्र सन्न्यासशब्दार्थः बहुभिः दार्शनिकैः बहुधा व्याख्यातः अस्ति। सन्न्यासयोगात् इत्यस्य काम्यकर्मपरित्यागमात्रत्वं ग्राह्यं वा सर्वकर्मपरित्यागो ग्राह्यो वा इति भिन्नभिन्नव्याख्यानानि दृष्ट्वा संशयो जायते। तत्र गीतास्वपि "काम्यानां कर्मणां न्यासं सन्न्यासं कवयो विदुः"[4] इति भगवद्वाक्यमपि तत्र कर्मत्यागमात्रं फलत्यागादिमात्रपरं वेति संशयो जायते। तथापि "निश्चयं शृणु मे तत्र त्यागे भरतसत्तम"[5] इत्युक्त्वा स्वनिश्चयं त्यागविषयकं श्रावयता भगवतात्याग-सन्न्यासशब्दाभ्यां सात्त्विकादिभेदेन युक्त एव त्यागः सन्न्यासो वा गृह्यते। स च सात्त्विको त्यागः "सङ्गं त्यक्त्वा फलं चैव"[6] इत्यादिना उक्तः। तत्पश्चात् तस्य कर्मयोगाङ्गत्वमेव इति भावयता भगवता, तस्य अनिष्टमिष्टमित्यादिना फलमप्यस्तीति प्रोक्तम्। तच्च फलमत्यागीनाम् अपरमार्थसन्न्यासिनामेव भवति न परमार्थात्मज्ञाननिष्ठानामिति भगवता एव स्पष्टमुक्तमित्यतः नात्र संशयः। तस्मात् मुण्डकश्रुतावपि सन्न्यासयोगात् इत्यत्र भाष्यकारेण ते च संन्यासयोगात् सर्वकर्मपरित्यागलक्षणयोगात्केव लब्रह्मनिष्ठा-स्वरूपाद्योगाद्यतयः इति व्याख्यातम्[7]

भाष्यकारेण बृहदारण्यकोपनिषद्भाष्ये सन्न्यासविषये निरूपणमत्यधिकं दृश्यते। सन्न्यासाश्रमः सन्न्यासः इत्यनयोः पार्थक्यमाचार्याः समीहन्ते इति तेषां वाक्यतः दृश्यते।

"एतं वै तमात्मानं विदित्वा ब्राह्मणाः पुत्रैषणायाश्च"[8] इति मन्त्रव्याख्यानकाले आत्मानं विदित्वा नाम आत्मस्वरूपः ब्रह्मस्वरूपः स्वयमहमस्मि इत्येवं निश्चित्य ब्राह्मणाः एषणात्रयलक्षणात् संसारात् व्युत्थानं प्राप्नुवन्ति। भिक्षाचर्यं च कुर्वन्ति इति व्याख्यातम्।

अत्रैव व्युत्थाने यज्ञोपवीतादिकर्मसाधनपरित्यागः आहोस्विन्न इति विवेकः कर्तव्यः, प्रायः कामादिवशात् कर्मासक्तानां कर्मपरित्यागे इच्छा न भवति। कर्मत्यागे भवेत् कदाचित्, तस्मादेव भाष्यकृता श्रुत्यर्थः स्वात्मस्वरूपनिर्धारणपूर्वकम् एषणाभ्यः व्युत्थानमिति व्युत्थानपदार्थः व्याख्यातः। एवं सर्वस्मादपि एषणात्रयसमुद्भूतात् संसाराद्व्युत्थितस्य स्वात्मज्ञाने अधिकारः भवति। इत्थमत्र सन्न्यासः नाम एषणात्रयपरित्याग एव नाश्रमसन्न्यास इति स्पष्टम्।

अन्यच्च अस्मिन्नेव प्रसङ्गे "ब्राह्मणानाम् एवाधिकारो व्युत्थाने" अतो ब्राह्मणग्रहणमिति[9] वाक्यं पठित्वा बहूनां संशयो जायते किमत्र ब्राह्मणपदेन ब्राह्मणवर्णविशिष्टानामेव ग्रहणं वा इति। तादृशसंशयस्य वारणाय क्वचित् वार्तिककारमते ब्राह्मणपदमत्र वर्णानामुपलक्षणपरतया भाष्यकारेण प्रयुक्तमन्यथा ब्राह्मणक्षत्रियविशामिति त्रयाणां ब्रह्मविद्यायामधिकारः इति श्रुतिविरोधः स्यादिति तत्र च टिप्पण्यां[10] सम्पादिते बृहदारण्यकोपनिषत्पुस्तके विचारोऽयमुपस्थापितः। किन्तु तत्र स्वारस्यमहं नानुभवामि। पूर्ववाक्ये ब्राह्मणस्य लक्षणमुक्त्वा, परस्मिन् वाक्ये ब्राह्मणानामेव अधिकार इति वदतुः भाष्यकारस्य पूर्ववाक्योक्त- ब्राह्मणग्रहणे साधनचतुष्टयसम्पन्नः प्रपञ्चो मिथ्येति आपातनिश्चयवान् एवात्र ब्राह्मणपदेन ग्राह्यः। अत्र वर्णाश्रमविशिष्टस्य ब्राह्मणादिजातिविषयस्य वा चर्चायामास्पदाभावात् तथा न युक्तमिति नो मनः।

भाष्यकारमते ब्राह्मणः नाम एषणात्रयसन्न्यासी। सन्न्यस्तो नाम अहमस्मि परं ब्रह्म इत्याकारकेन निश्चयेन स्थितः ब्राह्मणः क्षत्रियः, वैश्यः, शूद्रः यः कश्चित्। अत्यन्तशूद्रत्वे यज्ञोपवीतादिधारणाभावात् तेषां नित्यानित्यविवेकादिसाधनसिद्धिः सुदुर्लभा इति स्मृत्यादिषु त्रैवर्णिकानामेव ग्रहणं कृतमिति ग्राह्यम्। यज्ञोपवीतादीनां धारणे नियमिते वर्णाश्रमव्यवस्था निर्वाहः सुकरः तेन च सर्वप्रजाविधारणं सुलभमिति धर्मविदां निश्चयः। तद्यद्वास्तु भाष्यकारस्त्वत्र सन्न्यासपदेन एषणात्रयसन्न्यासं प्रथममिच्छति।

अहो सामर्थ्यं भाष्यकारस्य, स्वयं सन्न्यासाश्रमविशिष्टोऽपि, एषणात्रयसन्न्यासमेव प्रमुखतः स्तौति नाश्रमसन्न्यासमिति महद्धैर्ययुक्तता भाष्यकृतः भाति।

अन्यच्च वर्णाश्रमविषये अध्यासनिरूपणमस्याभिप्रायस्य उपोद्बल-कम्। अध्यासभाष्ये अपि उक्तं भाष्यकृता यत् "'तथाहि ब्राह्मणो यजेत' इत्यादीनि शास्त्राणि आत्मनो वर्णाश्रमवयोवस्थादिविशेषाध्यासमाश्रित्य प्रवर्तन्ते"[11] इति। अस्मादपि निरूपणात् स्पष्टं ज्ञायते यत् आश्रमसन्न्यासोपि वस्तुतः आश्रमान्तर्गतः उत्कृष्टाध्यासरूपः मोक्षमार्ग एव कश्चित्। तत्राप्यध्यासानुवृत्तिदर्शनात् तद्व्यतिरिक्त एव परमार्थसन्न्यासः वक्तव्यः इति सिद्ध्यति। स च परमार्थसन्न्यासो येन शास्त्रश्रवणेन सन्निहिततमः स्यात् तद्वेदान्तशास्त्रम्। तस्मादेव शास्त्राध्ययनप्रयोजनं निरूपयता भाष्यकृता आत्मैकत्वविद्याप्रतिपत्तिरित्युक्तम्। विद्या प्रतिपत्तिरिति शब्दयोः प्रयोगात् विद्या नाम ज्ञानम्। प्रतिपत्तिः नाम बुद्धिः। उक्तं च वेदान्तसारे अपि निश्चयात्मिका अन्तःकरणवृत्तिः बुद्धिः[12] इति। तस्मात् वेदान्ताध्ययनेन अहं ब्रह्मास्मि[13] इति आपात निश्चयमात्रं भवति। एतदेव आत्मज्ञाननिष्ठा शब्देन अभिधीयते। अन्यथा शास्त्राध्ययनमात्रादेवात्मज्ञानसिद्धौ आचार्यवान् पुरुषो वेद[14] इत्याचार्यावश्यकताबोधकशास्त्रस्य, नायमात्मा प्रवचनेन लभ्यः[15] स्वप्रयत्नेनात्मतत्वावगमो न भवतीति प्रतिपादकस्य स्वप्रयत्नमात्रनिषेधकस्य शास्त्रस्य, तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत्[16] इत्यादि गुरूपसदनविधायकशास्त्रस्य च वैय्यर्थ्यापत्तेः। अतः आत्मज्ञाननिष्ठा एव परमार्थसन्न्यासः भाष्यकारस्य अभिप्रेतः इति सिद्ध्यति। अनेन आश्रमरूपं पारिव्राज्यमपि आत्मज्ञानलक्षणस्य सन्निहितमिति आपाततः स्तुतमेवेति शम्।

**उपयुक्तग्रन्थसूची**


१) ब्रह्मसूत्रशाङ्करभाष्यम् - मोतीलाल बनारसीदास प्रकाशितम्।

२) श्रीमद्भगवद्गीता - दक्षिणामूर्तीमठप्रकाशनम्, वाराणसी।

३) एस् सुब्रह्मण्यशास्त्री सम्पादितमुपनिद्भाष्यस्य खण्डत्रयम्।


**सन्दर्भ ग्रन्थः -**

1. भ. गी. उपोद्घातभाष्यम् पृ. ७
2. बृ. उ. ३. ५. १- पृ २५६
3. मु. उ. ३. २. ६
4. भ. गी. १८. १ पृ.८४९
5. भ. गी. १८. ४, ८४९. पृ
6. भ.गी. १८. ९, पृ-८५५
7. मु.उ. ३. ३. २. ६, पृ-१५८
8. बृ.३. ३. ५. १,पृ-७०८
9. बृ. उ. शा. भा. गी. गो, पृ- ७१६
10. बृ. उ. १. ४. १६५, पृ- २५३ एस् सुब्रह्मण्यशास्त्री
11. ब्र. सू. शां. भा. १.१.१.१ पृ- २४
12. वे. सार. पृ. ७८
13. बृ. उ. १.४.१० पृ ८७
14. छा.उ. ६.१४.२ पृ२७८
15. मु. उ. ३.२.४. पृ. १५८
16. मु. उ. १.२.१२ पृ. १३९